CAMBRIDGE INTERNATIONAL EXAMINATIONS

**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2014**

Additional materials:
Answer paper

**TIME** $2^1/_2$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**This question paper consists of 9 printed pages.**


© UCLES 2014

**1** *Buddhacarita of Aśvaghoṣa*

**(i)**

ततः कुमारो जरयाभिभूतं दृष्ट्वा नरेभ्यः पृथगाकृतिं तम् ।
उवाच संग्राहकमागतास्थस्तत्रैव निष्कम्पनिविष्टदृष्टिः ॥

क एष भोः सूत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः ।
भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा ॥

इत्येवमुक्तः स रथप्रणेता निवेदयामास नृपात्मजाय ।
संरक्ष्यमप्यर्थमदोषदर्शी तैरेव देवैः कृतबुद्धिमोहः ॥

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥

पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम् ।
क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः ॥

इत्येवमुक्ते चलितः स किंचिद्राजात्मजः सूतमिदं बभाषे ।
किमेष दोषो भविता ममापीत्यस्मै ततः सारथिरभ्युवाच ॥

आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी ।
एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः ॥

*Book 3, vv 27 to 33*

**(a)** Translate lines 1 to 4, *'tataḥ . . . prakṛtir yadṛcchā'.* [6]

**(b)** Translate and identify the following compounds:
- **(i)** *'rathapraṇetā'* (line 5)
- **(ii)** *'rājātmajaḥ'* (line 11) [2]

**(c)** What did the prince see on this and subsequent journeys? Comment on how this was a significant turning point in the prince's life. [2]

**(ii)** अमुत्राहमयं नाम च्युतस्तस्मादिहागतः ।
इति जन्मसहस्राणि सस्मारानुभवन्निव ॥

स्मृत्वा जन्म च मृत्युं च तासु तासूपपत्तिषु ।
ततः सत्त्वेषु कारुण्यं चकार करुणात्मकः ॥

कृत्वेह स्वजनोत्सर्गं पुनरन्यत्र च क्रियाः ।
अत्राणः खलु लोकोऽयं परिभ्रमति चक्रवत् ॥

इत्येवं स्मरतस्तस्य बभूव नियतात्मनः ।
कदलीगर्भनिःसारः संसार इति निश्चयः ॥

द्वितीये त्वागते यामे सोऽद्वितीयपराक्रमः ।
दिव्यं लेभे परं चक्षुः सर्वचक्षुष्मतां वरः ॥

ततस्तेन स दिव्येन परिशुद्धेन चक्षुषा ।
ददर्श निखिलं लोकमादर्श इव निर्मले ॥

सत्त्वानां पश्यतस्तस्य निकृष्टोत्कृष्टकर्मणाम् ।
प्रच्युतिं चोपपत्तिं च ववृधे करुणात्मता ॥

*Book 14, vv 3 to 9*

**(a)** Translate lines 1 to 4, *'amutra .... karuṇātmakaḥ'.* [6]

**(b)** Translate and identify the following compounds:
- **(i)** *'sarvacakṣuṣmatām'* (line 10)
- **(ii)** *'nikṛṣṭotkṛṣṭakarmaṇām'* (line 13) [3]

**(c)** Explain the simile in line 8. [1]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)** योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥

इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥

*Book 1, vv 7 to 9 and Book 2, vv 97 to 99*

**(a)** Translate and identify the following compounds:
- **(i)** *'atīndriyagrāhyaḥ'* (line 1)
- **(ii)** *'sarvalokapitāmahaḥ'* (line 6)
- **(iii)** *'vipraduṣṭabhāvasya'* (line 8) [4]

**(b)** Translate lines 9 to 12, *'śrutvā . . . pādādivodakam'.* [6]

(ii) दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥
समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥
सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः ।
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ॥
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥

*Book 7, vv 18 to 20 and Book 12, vv 118,119*

**(a)** Translate lines 1 to 4, *'daṇḍaḥ . . . sarvataḥ'.* [6]

**(b)** Translate and identify the following compounds:
**(i)** *'adharme'* (line 8)
**(ii)** *'karmayogam'* (line 10) [2]

**(c)** Explain the simile in line 6. [2]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)**

सूर्यो यथा सर्वलोकस्य चक्षुर्
न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः ॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥
तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म
यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥

*Kaṭha Up. 2:2: 11 and 15; Muṇḍaka Up. 1:1: 3,4*

**(a)** Translate and identify the following compounds:
  **(i)** *'lokaduḥkhena'* (line 4)
  **(ii)** *'candratārakam'* (line 5) [2]

**(b)** Express in your own words the message of line 8. [2]

**(c)** Translate lines 9 to 12, '*śaunako ... caivāparā ca'.* [6]

**(ii)** जनकं ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इति अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तं हास्मै ददौ तं ह सम्राडेव पूर्वं पप्रच्छ॥ याज्ञवल्क्य किंज्योतिरयं पुरुष इति। आदित्यज्योतिः सम्राडिति होवाच आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। एवमेवैतद्याज्ञवल्क्य॥ अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। एवमेवैतद्याज्ञवल्क्य॥

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म। अभयं वै ब्रह्म। अभयं हि वै ब्रह्म भवति य एवं वेद॥

*Bṛhadāraṇyaka Up. 4:3: 1 to 3 incl. and 4:4: 25*

**(a)** Translate and identify the following compounds:
**(i)** *'kāmapraśnam'* (line 3)
**(ii)** *'ādityajyotiḥ'* (line 5) [2]

**(b)** Translate lines 7 to 9, *'astamita . . . yājñavalkya'.* [6]

**(c)** List one positive Sanskrit term and five negative Sanskrit terms, together with their translations, drawn from lines 10 and 11, showing ways in which the Upaniṣads attempt to describe Ātman and Brahman. [2]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥

*Chap. 6, vv 33 to 35; Chap. 14, vv 8 and 9*

**(a)** Translate lines 1 to 4, *'yo 'yaṃ . . . suduṣkaram'.* [4]

**(b)** Translate and identify the following compounds:
- **(i)** *'mahābāho'* (line 5)
- **(ii)** *'ajñānajam'* (line 7)
- **(iii)** *'sarvadehinām'* (line 7) [3]

**(c)** What does Kṛṣṇa say of the effects of ignorance in the final two verses above? [3]

**(ii)** अशोच्यानन्वशोचस्त्वं प्राज्ञवादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पंडिताः॥

अशोच्यानित्यादि। न शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात्परमार्थरूपेण च नित्यत्वात् तानशोच्यानन्वशोचोऽनुशोचितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेति। त्वं प्राज्ञवादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे। तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयस्युन्मत्त इवेत्यभिप्रायः। यस्माद्गतासून्गतप्राणान्मृतान् अगतासूनगतप्राणाञ्जीवतश्च नानुशोचन्ति पंडिता आत्मज्ञाः। पण्डा आत्मविषया बुद्धिर्येषां ते हि पंडिताः "पांडित्यं निर्विद्य" [बृ.३.५.१] इति श्रुतेः। परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढोऽसीत्यभिप्रायः॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā, Chap. 2, v 11*

**(a)** Translate lines 3 to 8, *'na śocyā . . . ivetyabhiprāyaḥ'.* [6]

**(b)** Enumerate four ways in which Śaṅkara explains and sheds light on the meaning of the Bhagavad Gītā text, as far as possible giving examples from the above passage. [4]

[Total: 10 x 2 = 20 marks]

END